५१ स्मास्विंद्रियंदधात्वस्मान्नायंउतपुत्राःसंचेतामुस्मासुसंन्वाग्निपःसानेःप्रियासुत
तृप्तिर्मुघोनीरिति॥होतुर्देयाअध्वर्यवेत्येतत्कालेध्वर्युरन्वारंभंविमुच्यदारुपात्रीरुछ
दक्षिणंहविश्चतुर्धाकृत्वाबर्हिषदंकरोति॥उपहूतोयमित्येतत्कालेगोरूपा
यारडायाःवत्सत्वेनवायुंमनसाध्यान्वायजमानाध्वर्युजपतः॥उपहूतःपशुमा
नसानीति॥अध्वर्युरग्नीधेषडवत्तमवदधाति॥तदूस्तआज्यस्थात्प्राज्येनोप
स्तीर्यडापंचमभागार्धमवधायतेनैक्षिघार्यपुनरुपस्तीर्यावशिष्टमवदाय
पुनरभिघारयेत्॥यजमानपंचमाडांप्राश्नंति॥होत्रावोतरेडायांप्राश्य ५१
बा२

मानायांयजमानोनुमंत्रयते॥जुष्टिरसिजुषस्वनोजुष्टोनोसिजुष्टिंतेगमेयमिति॥
आमार्ज्जनादाग्यमः॥द्विराचम्यमार्ज्जयंते॥बर्हिष्यग्नीध्वर्यूतूष्णीं॥प्रस्तरेयज
मानः॥मनोज्योतिर्जुषतामाज्यंविछिन्नंयज्ञंसमिमंदधातु॥बृहस्पतिस्तनुता
मिमंनोविश्वेदेवाइहमादयंतामिति॥होत्यङ्कृत्वाध्वर्युःपरिकर्मिणमाह॥ब्रह्म
न्प्राग्निंत्रंपरिहरेति॥परिकर्मीसोदपात्रेप्राग्निंत्रमग्नेर्वाहवनीयंब्रह्मणो
परिहरति॥ब्रह्मन्दाक्ष्यमाणमीक्षस्वेति॥मित्रस्यत्वाचक्षुषाप्रतीक्षइति॥दे
वस्यत्वा॥भ्योप्रतिगृह्णामीतिदक्षिणेनाप्रतिगृह्यपृथिव्यास्त्वानाभौसा

५२ दयाम्यदित्याउपस्तृणातिकुशेषु प्रागग्रेषुनिधायांगुष्ठोपकनिष्ठाभ्यांसंगृह्यस्रुवमाश्रीया
त्।।अग्नेष्टुस्यनुप्राञ्जिमिद्वहस्यनेनुरूपेणेति।तस्मीमाचम्याचाचामेत्।।सुत्येनत्वाभि
ज्ञिघर्म्मियोभूक्षंचेतदेवतोरुग्रावृदंश्रोमयंतुचक्षुःश्रोत्रंन्याग्यानमेमोहिंसीरिति।।नाभि
मालभेतेडेस्यत्वाजुष्टंरदधामीति।।प्रक्षाल्यप्राञ्चित्रंहरत्यंत्रिरनेनाभ्यात्मंपो
निनयते।।यजमानश्चनुर्द्धाकृतंपुरोडाशंमभिमंत्रयते।।ब्रह्मणिचेक्षुरदंतोमे
यि माक्षीं कुर्यंतोमेमोपदसदिति।।भागान्व्याद्दिशति।।इदंब्रह्मणः इदंहोतुः इद
मध्वर्योः।।इदमग्नीधइति।।अभिमृश्यपृथग्भागान्ग्नीधेप्रथमंहरेत्।।उप
स्तीर्यद्विधाभागंकृत्वातस्यैकमाहरेत्।।उपस्तीर्यान्यमाधायततोद्विरभिघार ५२

येत्।।एतदग्नीधएवस्याद्देवेनऋग्भणाहरेत्।।होत्रेचाध्वर्यवेचान्येभ्यःपात्रेभागान्प्रय
च्छरेत्।।ब्रह्मावेदनिधायदत्तंस्वभागहृयंप्राञ्चित्रेनिदध्यात्।।तत्पश्चात्कुशेषुयज
मानभागंपात्रांतरैरित्यनियतप्राप्तावपिस्रुवेणहोतुर्ग्रहाध्वर्योरितिस्रुवांतर
दृष्टपात्रग्रहणबाधकाभावः।।चतुर्धाकरणस्यइदंब्रह्मणइत्यादिग्रामा
त्रश्रुतेर्मक्षाश्रावणाच्चपरिक्रियार्थतेतिकेचित्।।अन्येतु।।अन्याहार्यदर्शनप्र
तिग्रहश्रुतेर्देवतायेदत्तावशिष्टस्यावकीर्णकरतानिवृत्तिरूपप्रतिपत्यर्थत्वेन
योग्यतयाचभक्षणमेवप्रतिपत्तिरयमतेनिकर्तृमात्रापेक्षायांब्रह्मादयोनिय

म्यंते॥ नियमस्यापि करिष्यमाणकर्मकोशलेन दृष्टमेव प्रयोजनमितिभक्षार्थतामाहुः
॥ परेतु॥ भवतुभक्षार्थतादक्षिणार्थत्वमपिसंगच्छते॥ देवतायैदत्ते हविषियज्ञमा
ति नस्यास्याम्नानपुनर्दानंघटतइँचेत्न॥ स्विष्टकृत्करणायोगात्॥ स्मार्त्तेहविरुछि
एस्येवदक्षिणात्वस्मरणात्॥ इष्टिकल्पेकर्मीतेदर्शपूर्णमासयोरन्वाहार्यश्चपु
रोडाशस्यचतुर्धाकरणंचविस्पष्टंतेदक्षिणेयास्येपेतियुक्तेश्च॥ यदिस्विष्टकृति
वचनंप्रमार्थंतदक्षिणात्वेध्ववश्लिष्टं। नचेवंतर्हिकृतंभक्षणायासेन॥ हविःशे
षोह्यासनेनेवब्रह्मादिसंबंधमात्रेणेवप्रतिपत्यंशस्यसिद्ध्यादितिचेन्नान ५३

न्वाहार्यवत्केवलदक्षिणार्थत्वंचतुर्धाकरणस्यब्रूमः॥ किंतुप्रतिपत्यर्थत्वम
पि॥ यदिभगवतोवौधायनस्येषाभिसंधिर्नस्यान्नाग्नीधेपउक्तमिडायामिव
ब्रूयात्॥ किंच॥ चतुर्धाकरणस्यकेवलदक्षिणार्थत्वेप्रतिग्रहात्सर्वमन्वाहार्य
श्चचतुर्धाकरणंनाशेहविरुत्पत्तिप्रसंगात्॥ एकाध्वर्युप्रयोगेऽन्वाहार्यश्
चतत्क्रोपक्रियाप्रसंगाच्च॥ तस्माद्दक्षिणात्वेनप्रतिग्रहः॥ भक्षणंचप्रतिपत्यर्थ
त्वेनेत्याहुः॥ वस्तुतस्तुदक्षिणार्थत्वेपिनास्यभक्षणंविनान्योपयोगः॥ तदपि
नान्वाहार्यस्येवबहिःप्रयोगंघटते॥ शेषत्वंह्यात्मनेचकरनिर्मथितंद

धि॥ बर्हिर्वेदिषु रोजा रंजग्धानाया दहर्निशं रतिषद्भिश्चान्मतेप्रायश्चित्तस्मरणात्
॥तस्माच्चतुर्धाकरणंप्रतिगृह्यथाप्रयाजंनोमीमांसानभिज्ञाःकेवलंदर्शपूर्णमा
सापूर्वमेवविनाशयंतीत्यलंपल्लवितेन॥अग्नीदध्वर्युःसन्नद्धोकृत्वोपान्यत्र
भागोप्रतिगृह्णीयात्तं॥देवस्यत्वाश्व्योःप्रतिगृह्णामिराज्ञोत्वावरुणोनयतुदेवि
दक्षिणेवाचेन्द्रंतेनाम्रतत्वमश्यां वयोधात्रे नयोमध्यमस्कृतिंप्रतिगृह्णीत्रे क
अ इदंकस्मैदात्कामः कामायकामोदाताकामःप्रतिगृहीताकामैतत्समुद्रमा
विशा कामेनत्वाप्रतिगृह्णामि कामैतत्तेएषातेकामदक्षिणो नानस्वा ५४

गोरसः प्रतिगृह्णात्विति॥होत्रेब्रह्मणेब्रह्मयतिरिक्तंनक्षयेयुः॥अथाध्वर्युश्च
तुर्णांपिर्यंदक्षिणाग्नेःसदोदंधाज्यस्थाज्येनाभिघार्यदक्षिणस्यांश्रो
ण्यामासादयति॥ब्रह्मातमवेक्षेत॥प्रजापतेर्भागोस्यूर्जस्वान्पयस्वान्क्षितिं
रसिमामेक्षेषाअस्मिंश्चक्षोकेमुष्मिंश्चेति॥अन्येनांगेनास्पृशन्नवजिघ्रेत्॥
प्राणापानौमेपाहिकामायत्वेति॥अंगुष्ठोपकनिष्ठिकाभ्यांततःपुत्रकामंत्रं
गृहीत्वाब्रह्मभागेनिदध्यात्॥अथयजमानोभिमृशति॥प्रजापतेर्भागोस्यू
र्जस्वान्पयस्वान्प्राणापानौमेपाहिसमानव्यानौमेपाह्युदानव्यानौमेपाह्यक्षिं

तो स्यक्षित्ये त्वामामेक्षेष्ठा अमुत्रामुष्मिँल्लोक इति तत ऋत्विज अयं वओदनो यथाँगं प्रतिगृह्णीधमितिप्रतिग्राहयतितेपूर्ववत् प्रतिगृह्णीयुः॥ब्रह्मणाऽन्नं इतिविशेषः॥अन्वाहार्यंहविरुच्छिष्टंचाग्नेपात्रंचमुद्वास्याहब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीसंधीँश्चाग्निंचसत्कृत्संमृज्जीति॥ब्रह्मन्बृहस्पतिर्ब्रह्मन्नसदनआशिष्टबृहस्पतेयज्ञमवतुपः सयस्मैपाहि सयज्ञपतिंपाहि समांपाहिभूर्भुवश्चबृहस्पतिप्रसूतः ॐप्रतिष्ठेति॥अध्वर्युः ॐप्रतिष्ठेत्युक्तेनुयाज समिधं तूष्णीमग्नावादधाति॥आग्नी ५५

ध्रः अस्मैरेधसन्नहनेः पर्ववत्परिधीन्त्सत्कृत्संमृज्यसत्कृत्समिधंसंमार्ष्टि॥अग्नेवाजजिद्वाजंत्वाग्नेसरुवाँसंवाजैजिगिवाँसंवाजिनंवाजजितंवाजजित्यायैसंमार्ज्म्यग्निमन्नादमन्नाद्यायेति॥अथैतानिविस्रस्याद्भिःसंस्रुत्याहवनीयेनुप्रहरति॥योभूतानामधिपतीरुद्रस्तेतिचरुंवपा॥पृश्नस्माकंमाहिँसीरेतदस्तुतेतवस्वाहेति॥यज॰भूतानामधिपतयेरुद्रायतंतिचरायेदं॥उभावपउपस्पृशतः॥अध्वर्युर्ब्रह्मोपभृतावादायात्याक्रम्याभ्राव्याहदेवान्यजेति॥वषट्कृतेसमिधः पूर्वार्धेजुहोति॥द्वितीयेयजेति॥समि

धोमध्येजुहोति॥तृतीयेयजेति॥प्राञ्चंसंनतयाधारयाप्रथमेनसंयोजयन्जुहो
ति॥यजमानः॥प्रथमद्वितीययोरग्नयइदं॰॥तृतीयेग्नयेस्विष्टकृतइदंइति
कर्मनाम॥देवायबर्हिषइदं॰देवायनराशꣳसायेदं॰देवायाग्नयेस्विष्टकृत
इदमितिनुसंप्रदायःअनुमंत्रणे॥प्रथमादिषु॥बर्हिषोहंदैवयुज्ययोर्प्रजा
वान्भूयासं॥नराशꣳस्यहंदैवयुज्ययोपशुमान्भूयासं॥अग्नेस्विष्टकृ॰
युष्मा॰यं॥उदङ्त्याक्रम्ययथायतनंस्रुचोसादयित्वायजमानाध्वर्यू॰वा
जवतीभ्यांस्रुचोव्यूहतः॥दक्षिणेनजुहूमुद्धृत्यावगृह्णीतः॥वाजस्यमाप्रस॰ ५६

वेनोक्रमेणोदयमीतरति॥सव्येनोपभृतंपीडयतः॥अथोसुपत्नाꣳइडेमिनि
ग्राभेणाधरासꣳअकरिति॥दक्षिणेनप्राचीजुहूंप्रेरयतआदक्षिणादंसात्॥उ
द्ग्राभंचनिग्राभंचब्रह्मदेवाअवीवृधन्॥प्रतीचीमुपभृतमोनरश्रोणिंप्रेर
यतः॥अथोसुपत्नीनेꣳग्नीमेविष्टचीनान्यस्यतामिति॥अ॰प्राच्याजुहूपरि
धीनन्नक्ति॥मध्यमं॥वसुभ्यस्त्वेतिदक्षिणांरुद्रेभ्यस्त्वेति॥अप॰उत्तरं॥आदि
त्येभ्यस्त्वेति॥यथालिंगंत्यागः॥उपभृतमद्भिःसꣳस्रवयथायतनंस्रुचो
सादयित्वाविधृतीभ्यांसहप्रस्तरमादायजुहूमग्राण्यनक्ति॥अनक्तुंरिहो

प्रा इति उपधत्ति मध्यानि॥ वि यंतु च यै इति॥ ध्रुवा यां मूलानि॥ प्रजां योनिं मा
निर्मृक्षमिति॥ अक्तस्य तूष्णीं मादाय प्रज्ञातं निधाय दक्षिणोत्तराभ्यां पाणिभ्यां
जुह्वां प्रस्तरं प्रति ष्ठाप्याश्राव्य प्रत्याश्रावितेऽाह॥ ऋषितो देवा हो तारोऽन
ङ्वाच्याय प्रेषितोमानुषः सूक्तवाकायस्सूक्ताद्ग्रहीति॥ अग्निरिदमित्यादिका
लेध्वर्युर्यजमानमुज्जितीर्वाचयति॥ यथोदेवतमग्नय इत्यादित्याग्नेर्व
कमुग्नेरहमुज्जितिमनूज्जेषं॥ सोमस्याहमुज्जितिमनूज्जेषं॥ अग्नेरहं॰
विष्णोरहमुज्जिं॰ अग्नीषोमयोरहमु॰ इंद्रस्यवेमूधस्याहमुज्जिं॰ देवानो ५७

माज्यपा नामूहमु॰ अग्नेस्विष्टकृतोहमु॰ ज्जेषमिति॥ यदाशास्तेयं यजमानर
ति शृणोति तदा यजमानंयजस्व दोहयाचयति॥ एमाअग्मन्नाशिषो दोहका
माइंद्रंवतो वनामहेधुक्षीमहिप्रजामिषमिति॥ नमोदेवेभ्य इत्यत्कालेप्रस्त
र मुपरीवप्रागायत मग्निमतीत्याग्नेयथाभवति तथाप्राचमग्नेप्रहरति॥
आप्यायंतामापऊं षधयोमरुतांएषतयस्रुचिंगछतंतोनोदृष्टिमेरय॥
स्वाहेतिविद्यारण्याः॥ प्रहरन्नादग्धानांप्रस्तराग्रापांज्वालाक्रमेन कु
र्यात्॥ नप्रत्यक्कुर्षेत्॥ नतिर्यङ्नाल येत्॥ आमूलमूर्ध्वंदीपयेत्॥ प्रदीपयमा

णयजमानोनुमंत्रयते॥रोहितेनत्वाग्निर्देवतागमयतुहरिभ्यांत्वेंद्रोदेवतागमयतु
तेजसेत्वासूर्योदेवतागमयत्विति॥अध्वर्युरवनिष्टृणमादायाग्नीध्रमीक्षते॥
अग्नीत्इति॥तमाहाग्नीध्रः॥संवरइति।अ॰अगानग्नीत्आ॰अगन्।अ॰श्रा
वय॥ओ॰श्रौषट्अ॰इदंहवि॥आ॰अनुप्रहरेति।अ॰तृणमग्नौप्रहृत्याह॥
स्वगादेवाहोत्राभ्यःस्वस्तिर्मानुषेभ्यःशंयोर्ब्रूहीति॥उपोच्छ्याहवनीयमुपति
ष्ठते॥आयुष्याअंगिरस्यायुर्मेपाहि॥चक्षुष्याऽअग्नेसिचक्षुर्मेपाहि॥उपवि
श्यांतर्वेदिभ्रुमिमभिमन्त्रयते॥भ्रूनासीति॥मध्यमंपरिधिमाहवनीयेनु ५८

प्रहरति॥यंपरिधिंपर्यधत्थाऽअग्नेदेवपणिभिर्वीयमाणः॥तंतऽएतमनुजोषंभरामि
नेदेष्णत्वदपचेतयातैइति॥दक्षिणोत्तरेयुगपदादधाति॥युक्तस्वपाथऽउपसमि
तमिति॥यजमानःपरिधीन्त्रिमुच्यमाननुमंत्रयते॥वितेमुंचामिरश्मानावि
रश्मीन्वियोल्कायानिपरिचरन्तीनानि॥धुन्तादस्मासुद्रविणंयज्ञेभद्रंप्रयोभ्रताङ्गा
गृधांदेवतास्विति॥शंयुवाकमनुमंत्रयते॥विष्णोःशंयोरहंदेवयज्यायैपृथि
व्याऽइडायास्पदेविष्टंयज्ञंसंधेविष्णवेत्वेतिजुहूमुखवऽउपभृतंसंस्रावयन्त्संस्रावेणपरिधीनभिजु
होति॥सुस्रावभागोसीत्युपांशुहंतःप्रस्तरेछावैहिषदेवाऽइमांवाचंमुखि

विश्वे गृणंत आसद्यास्मिन्बर्हिषि मादयध्वꣳ स्वाहेति॥ य० वसुभ्यो रुद्रेभ्य आदित्येभ्यः मं
स्तावभागेभ्यइदं० विश्वेभ्यो देवेभ्यइतिवा॥ प्रदक्षिणमावृत्यप्रत्यङ्डुत्य ध्रुवस्रु
चौविमुंचति॥ ध्रुवोभावउत्करउदग्ग्रंस्कंनिधाय तस्मिन्स्रुचौविमुंचति॥ अग्नेर्वा
मपेन्नगृहस्युसदैसिसादयामि सुम्नायेसुम्नि नीसुम्नेमोधत्तंधुरिधुर्यौपातमि
ति॥ अथहोत्रेवेदंप्रदायदक्षिणेनस्रुवामाज्यस्थालीसव्येनजुहूमादायप्रदक्षि
णमावृत्यप्रत्यङ्डुत्यवेदिंगार्हपत्यंचांतरादक्षिणेनपरिक्रम्यजघनेनगार्हप
त्यमुपविष्टायाःपत्न्यादक्षिणेनाध्वर्युरुप विशति॥ उत्तरेणगार्हपत्यंपरिक्रम्य ५९

होतुरुत्तरतःप्राञ्चमवॐर्ध्वजुरस्मएवाग्नीध्रः॥ अ० वेदमुपभृतंकृत्वाचतुरआज्य
स्यगृह्णाति॥ सोमायेत्युपांश्वनुब्रूहीत्युच्चैर्मंद्रं॥ आश्राव्यप्रत्याश्रावितआहसोम
मित्युपांशुयजेत्युच्चैः॥ वषट्कृतेजुहोति॥ यज० सोमायेदं०॥ सोमंस्याहंदैवयुज्यो
सुरेतारेतोधिषीयेत्यनुमंत्रयते॥ एवंग्रहणोपांशूच्चैर्ग्रहादान्यत्रापामपि॥ त्वष्टृ
अनुब्रूहि॥ त्वष्टारंयज॥ त्वष्टरिदं॥ त्वष्टुरहंदैवयुज्यो पशूनाꣳरूपंपुषेयं॥ प
रिश्रितेःपरिश्रिते वादेवानांपत्नीभ्यःअनुब्रूहि॥ देवानांपत्नीःयज॥ देवानां
पत्नीभ्यइदं०॥ अथस्रुवाहुतीर्जुहोति॥ राकायेस्वाहा॥ य० राकायाइदं०॥ सिनी

यज्ञाय स्वाहा॥ य० मिनीवाल्पाय इदं०॥ कुहूँ स्वाहा॥ य० कुहवे इदं०॥ अनुमतये स्वाहा॥ अनुमत्या इदं०॥ संपत्नीपत्यासुकृतेनगच्छतं यत्रस्यचुक्रोपुर्यीवभूतं॥ सुज्ञानानोविजेहतां मरीतादिविज्योतिरजरमारभेतां॥ स्वाहा॥ दिविज्योतिषेअजरायपरमात्मनइदं०॥ दर्शनेतनुवोयज्ञियास्ताःप्रीयातुयजमानोघृतेन॥ नारिष्ठयोःसुप्रिपमीडेमा नोदेवानांदेयेपियजमानोमतीभूत्स्वाहा॥ नारिष्टाभ्यामिदं०॥ यंवैदेवाअकल्पयन्नृज्वीभागꣳसतनवे॥ एतद्वोतेनेत्प्रीणातितेनेतत्प्रतमꣳहोस्वाहा॥ नारिष्टाभ्यामिदं०॥ ततःपूर्ववच्चतुर्गृहीतंगृहीत्वा॥ अग्नयेगृहपतयेनुब्रूहि॥ ६०

अग्निर्गृहपतिंयज॥ वषट्कृतेउत्तरपूर्वार्धेजुहोति॥ य० अग्नयेगृहपतयइदं०॥ देवानांपत्नीरग्निर्गृहपतिर्यस्तस्यमिथुनंतमीरहं देवयज्यामिथुनंनऋध्या समिति॥ अध्वर्युरपरेणपत्नीमग्नेयाहोतारमुत्तरतएत्यप्रत्यङ्मुखोहोतुरं गुलिपर्वणीपूर्ववदनक्ति॥ तेनक्तेसमाक्तंतद्स्तेचतुराज्यबिंदूनाज्येलो संपादयति॥ समचारिषेतेध्वर्युश्चपत्नीच॥ उपहूतायाग्निदायांयजमानः स्वरुछानस्रुएवउपेहूतःपशुमानमानीति॥ केचिन्नैत्यन्ये॥ अध्वर्युःआज्ये नेवाग्नीधआदधातिषउवनंउभोप्राक्त्याचमतः॥ आग्नीध्रः पूर्ववन्मार्ज

यते॥अध्व॰ तत्रऋच एवस्रुचिचतुर्गृहीतं गृहीत्वापसलैः पर्यावृत्यान्वाहार्यपच
नेजुहोति॥उत्तरवेदिमुसंस्तीर्यचुश्चर्पआज्यस्थालीमेवंदर्भपरिस्तरणान्नेयत्कपालै॥अ
वृत्रघ्नीविवृतः संयज्ञामिविश्वेदेवाहविरिदंजुषंतांयुष्मेयाविवृतः संतिबर्हिरेना
ताःसर्वास्विष्टाःसुकृताजुहोमिस्वाहेति॥य॰विश्वेभ्योदेवेभ्यइदं॰॥अपरंचतु
र्गृहीतंगृहीत्वेध्मप्रव्रश्चनान्यभ्याधायपत्नीकरणानोप्यपत्नीकरणहोमंजु
होति॥अग्नेरथायोक्षीततनोपाहिमाद्यद्विषःपाहिप्रसित्यैपाहिदुरिष्ट्यैपाहिदु
रस्यैपाहिदुश्चरितादविषन्नःपितुंकृणुसुषदायोनिंस्वाहेति॥य॰अग्नयेत्व ६२

रथायवेअक्षीततनवइदं॰॥अध्वर्युरुत्तरेणाहवनीयंगत्वावेदंप्रदाययज
मानंवाचयतीतिकेचित्॥तत्रऋचएवेत्यन्ये॥वेदोसिविनिरसिविदेयकर्मणिक
रणमसिक्रियासंसनिरसिसनितासिसनेयंघृतवंतंकुलायिनंरायस्पोषं
सहस्रिणंवेदोदेहातुवाजिनमिति॥होत्रेवेदंप्रदायतत्रयोगानंतरंपत्नीयोक्त्रं
विस्रस्यविमुंचति॥इमंविष्यामिवरुणस्यपाशंयमबध्नीतसावितासुकेतैः॥धा
तुश्चयोनौसुकृतस्यलोकेस्योनंमेसहपत्न्याकरोमि॥अ॰तूष्णीपत्न्यंजलौ
योक्त्रंनिधायप्रणीपात्रमानयति॥मानीयमानमनुमंत्रयते॥समाग्नेपासंपृच

यासमग्नेवर्चसाऽपुनः॥ मे पत्नी पत्या हं गच्छे समात्मा तनुवा ममेति॥ आप्यलायनहो
त्रानंतरं नेमो वापदार्थावनुष्ठे यो पत्नीस्योज्जलिगताग्निरद्भिः स्वमुखं मार्जयति॥
यदक्षुतेसरस्वतिगोघर्श्वेषुयन्मधु॥ तेनमेवाजिनीवतिमुखंमऽधिसरस्वती
य्य ति॥ अध्वर्युः पूर्ववत्पत्नी मपआचमँ व्रतंविसर्जयति॥ अग्नेव्रतपतेव्रतम
चारिषुंतदशकंतन्मेराधिस्वाहा॥ वायोव्रतपतेमचारिषुं॥२॥ आदित्यव्रत
पते ३॥ व्रतानांव्रतपतेऽ॥४॥ यजमानः पूर्ववत्यागं॥ पत्नीतीर्थेननिष्क्राम ६२
ति॥ अध्वर्युर्गार्हपत्यान्वाहार्यपचनयोर्मध्येन प्राङुत्यङ्वा मापाय य

ति॥ आप्यायतोर्ध्वावाघतेनयज्ञंयज्ञंप्रतिदेवयज्ञैः॥ सुर्याया ऊधोदित्याउपस्थेउ
रुधारापृथिवीयज्ञेअस्मिन्निति॥ यजमानोप्येतेनानुमंत्रयते॥ अथ यजमानः
स्वभागं प्राश्नाति॥ प्रजापतेर्विभान्नामलोकस्तस्मिंस्त्वादधामिसहयजमा
नेनेति॥ उपविशेद्यजमानेध्वर्युराज्यस्थालीमःस्रुवेणोपहत्यप्रायश्चित्तानिजु
होति॥ आश्रावितमृत्याश्रावितंवषट्कृतमृत्यनूक्तंचयज्ञे॥ अतिरिक्तंकर्मणोय
ज्ञेहीनंयज्ञःपर्वणिप्रतिरन्नेति कुल्मायन्स्वाहा॥ कृतायेतिरेतुदेवान्स्वाहा॥ यज्ञायेदं
॥ रुद्रेभ्यःस्वाहारुद्रेभ्यइदं॥ वपुरनिष्टेभ्यःस्वाहा॥ अनिष्टेभ्यइदं॥ येयज्ञेदुरि

ऽग्नेस्वाहा॥दुरिष्यार्इदं॰॥निर्ऋत्येस्वाहा॥निर्ऋत्यार्इदं॰॥दोरोध्येस्वाहा॥दोरोध्यार्इदं॰॥देवीभ्यस्त्वाभ्यस्वाहा॥देवीभ्यःस्त्वाभ्यर्इदं॰॥ऋध्येस्वाहा॥ऋध्यार्इदं॰॥समृद्ध्यैस्वाहा॥समृध्यार्इदं॰॥सर्वसमृद्ध्यैस्वाहा॥सर्वसमृध्यार्इदं॰॥नमोनामपिप्रजापतयइतिवा॥भूःस्वाहा॥अग्नयर्इदं॰॥भुवःस्वाहा॥वायवर्इदं॰॥सुवःस्वाहासूर्यायेदं॥भूर्भुवःसुवःस्वाहा॥प्रजापतयर्इदं॰॥इमंमेवरुणश्रुधीहवमुद्याचमृडय॥त्वामवस्युराचकेस्वाहा॥वरुणायेदं॰॥तत्त्वायामित्रात्मेष्टावंदमानस्तदाशास्तेयजमानोहविर्भिः॥अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्र ६३

मोषीःस्वाहा॥वरुणायेदं॰॥त्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः॥यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा॥अग्नीवरुणाभ्यामिदं॰॥सत्वंनोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ॥अवयक्ष्वनोवरुणꣳरराणोवीहिमृळीकꣳसुहवोनएधिस्वाहा॥अग्नीवरुणाभ्यामिदं॰॥त्वमग्नेअयास्यायासन्मनसाहितः॥अयासन्त्वमूहिषेयानोधेहिभेषजꣳस्वाहा॥अग्नयेअयसर्इदं॰॥अयाश्चाग्नेरस्यनभिशस्तीश्चसत्यमित्वमयाअसि॥अयंसोअग्नेसाधष्टोयसोहव्यमूहिषेयानोधेहिभेषजꣳस्वाहा॥अग्नयेअयसर्इदं॰॥

यद॒स्मिन्कर्मण्यत्यरीरमं॒ यद्वा॒ न्यूनमि॒हाक॑रं॒ ॥ अ॒ग्निश्चि॒त्तश्चि॑नुते॒ मनु॑स्वाहा॒ ॥ दे॒वेभ्य॒ऽइदं॑ ॥ यदि॒ह कर्म॑णोत्यरीरिचं॒ यद्वा॒ न्यूनमि॒हाक॑रं ॥ अ॒ग्निश्चि॒त्तश्चि॑नुतु॒ मनु॑श्चि॒त्तश्चि॑नुतं करोतु मे ॥ अ॒ग्नये॒ स्विष्ट॑कृते॒ सु हु॒त हु॒त आ हु॑तीनां॒ का॒मो॒ना॒ꣳ स॒म॒र्ध॒यि॒त्रे॒ स्वा॒ हे॒ति॒ ॥ अ॒ग्नये॒ स्विष्ट॑कृते॒ऽइदं॑ ॥ अ॒ग्नी॒षो॒मा॒भ्यां॒ ते॒ न॒ऽइ॒दं॒ वि॒श्वो॒जा॒ता॒भ्यां॒ परि॑ता बभूव ॥ यत्का॑मास्ते जुहु॒मस्त॒न्नो॑ अस्तु व॒यꣳ स्या॑म॒ पत॑यो रयी॒णां॒ स्वा॒ हा॒ ॥ प्र॒जा॒प॒तय॒ऽइदं॑ ॥ ब्रह्म॑ प्रति॒ष्ठे स्या॒ हु॒त॒यः॑ के चि॒दि॑छन्ति ॥ ब्रह्म॑ प्रति॒ष्ठा म॒नसो॒ ब्रह्म॑ वा॒चो ब्रह्म॑ यज्ञा॒ना॒ꣳ ह ६४

वि॒षा॒मा॒र्ज॒स्य॒ ॥ अ॒ति॒रि॒क्तं कर्म॑णो॒ यच्च॒ हीनं॑ यु॒क्तः प॒वी॒त्रैः प्र॒ति॒र॒न्नेति॑ कु॒ल्म॒यन्स्वाहा॑ कृ॒ स्वा॒ हु॒ति॒रे॒ तु॒ दे॒वा॒न्स्वा॒हा॒ ॥ दे॒वेभ्य॒ऽइदं॑ ॥ आश्रा॑वित॒मित्या॑श्रावि॒तं व॒षट्कृ॑त॒मित्या॑ह॒ नै॒र्ऋ॒तं॑ दे॒वा॒न्स्वा॒हा॒ ॥ दे॒वेभ्य॒ऽइदं॑ ॥ इ॒यो॒र्यता॑ये॒ति॒ वा॒ ॥ यद्वै दे॒वाऽअति॑पादयन्ति॒ वा॒ चाचि॑त्त्या॒ ये॒ तं दे॒व॒हे॒ड॒नं॑ ॥ अ॒ग्नायो॒ अस्मा॒ꣳ अभि॑ दु॒च्छु॒ना॒ य॒ते॒ प॒त्नी॒व॒स्मन्नि॑रृ॒तस्तं नि॑धेत॒ न॒स्वा॒हा॒ ॥ म॒रु॒द्भ्य॒ऽइदं॑ ॥ तं॒ मे॒ऽआप॒स्तदु॒ताय॑ते॒ पुनः॑स्वा दि॒ष्टा धी॒तिरु॒च्यै॒ य॒ज्ञस्य॑ ते ॥ अ॒यꣳ स॒मु॒द्र उ॒त वि॒श्वमे॑प॒जः॑स्वा॒हा॒ कृ॒त॒स्य॒ स॒मु॒त्प्लु॒त॒स्य॒ सु॒वः॑स्वा॒ हा॒ ॥ स॒मु॒द्रा॒ये॒दं॑ ॥ उद्य॑न्त॒मे॒ स्तु॒ स्मरि॑ प॒ऽइ॒षे॒ तो॒ज्यो॒ति॒रु॒त्त॒रं ॥ दे॒वं दे॒वत्रा॒ सूर्य॑म

६५ मन्मुज्योतिरमृतꣳस्वाहा॥ सूर्यायेदं॰॥ उदुत्यंजातवेदसंदेवंवहंतिकेतवः॥दृशे
विश्वायसूर्यꣳस्वाहा॥२सूर्या॰ इदं॰॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरु
णस्याग्नेः॥आप्राद्यावापृथिवीअंतरिक्षꣳसूर्य आत्माजगतस्तस्थुषश्चस्वा
हा॥सू॰इदं॰॥इमंमेवरुणतत्त्वायामित्वन्नोअग्नेसत्वन्नोअग्नेत्वमग्नेअया
सि॥प्रजापते॰॥इमंजीवेभ्यःपरिधिंदधामिमैषांनुगादपरोअर्धमेतं॥शा
स्त्रिरो तंजीवंतुशरदः पुरूचीमृत्युंदधतांपर्वतेनस्वाहा॥जीवेभ्यइदं॰॥इष्टेभ्य
इत्यष्टौ॥यन्नइंद्रभयामहेततोनोअभयंकृधि॥मघवंछृण्धितवतन्नोऊत ६५

स्विष्टकृ मेविद्विष्टोविमृधोजहिस्वाहा॥इंद्रायेदं॰॥स्विष्टकृद्विद्मस्तिरेत्रहाविमृधोवशी॥
दृषेंद्रपुरएतुनःसोमपाअभयंकरःस्वाहा॥इंद्रायेदं॰॥अग्निर्गृभिर्यदतोनऊत
माप्याययहरिवोवर्द्धमानः॥यूयमस्मोत्वयोमरुद्गणोत्राऊजासिक्रयिष्णवोऽर्च
तेस्यामुस्वाहा॥इंद्रायहरिवतइदं॰॥अनोसातुंयदालभंतंयुजस्यक्रियतेमिथुऽग्ने
नेतदस्यकल्पयत्वꣳहिवेद्यथातथꣳस्वाहा॥अग्नयइदं॰॥पुरुषसंमितो
यज्ञोयज्ञःपुरुषसंमितः॥अग्नेतदस्य॰तथꣳस्वाहा॥अग्न॰॥यत्पाकत्रांदीन मनसा
दृक्षानयज्ञस्यमन्वेतमोसः॥अग्निष्टद्धोताक्रतुविद्विजानन्यजिष्ठोदेवाꣳऋ

तुश्रोयंजातिस्वाहा॥अग्नयइदं॥इतिआज्यस्रुचौसंपाद्य॥पुनरुत्थाद्रित्वा॥ध्रु
वसंधुःसमिधतांपुनर्वोलोकंवसुनीधयतेः॥घृतेनत्वंतनुवोवर्धयस्वसत्याः
संतुयजमानस्यकामाः स्वाहेतिसमिधमाधायपुनरुत्थायपुनरुत्थायस्रुचे
पोकाकृतिःआदिसेप्योरुद्रेइदं॥ततःयन्मेऽन्नात्मनोमिंदाभूदग्निस्तत्पुनरा
हार्जातवेदाविचर्षणिःस्वाहा॥अग्नयेजातवेदसइदं॥॥पुनरग्निरक्षु
रस्तुनरिंद्रोबृहस्पतिः॥पुनर्मेअश्विनायुवंचक्षुरादत्तमुह्योःस्वाहा॥
अग्नयेइंद्रायबृहस्पतयेऽश्विभ्यामिदं॥ततःभ्रुस्वाहा॥ध्रुवःस्वाहा॥सु

वःस्वाहा॥भूर्भुवःसुवःस्वाहा॥एवंवत्सागः॥ततःप्रणवेनयच्चिश्चिते॥विश्रोयथा॥
यत्किंचेदं॥कितवासः॥॥उदुत्यं॥इमंमेवरुण॥तत्त्वायामि॥तंतुतन्वन्॥
अग्नयेतंतुमतइदं॥उद्ध्येस्वाग्ने॥प्रतिजागृह्येनमिष्टापूर्तेसंसृजेथा
मयेच॥पुनःकृण्वंस्त्वापितरंयुवानमन्वातांसीत्वयितंतुमेतंस्वाहा॥अ
ग्नयेतंतुमतइदं॥नेमंस्त्रिंशंतंतुंयेवितत्निरेयइमंयज्ञंस्वधयादद
ते॥तेषांछिन्नंप्रत्येतद्धामिस्वाहाघर्मोदेवाअंशुंतुस्वाहा॥दिवेत्वइदं॥
घर्मायेतिवा॥अत्रिभिरुपसामग्रेमरुत्वत्यहानिप्रथमोज्ञातवेदाः॥अनुसर्वे

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

स्यपुरुत्राचरुरमीननुद्यावोपृथिवीभ्यांतानूस्वाहा॥ॐअग्नयइदं॥मनोज्यो
तिर्ऋषतामाज्यंविच्छिन्नं॥याउष्टाउपसोनिमुचंश्चुतः संदधामिहविषाघृ
तेनूस्वाहा॥मनसेज्योतिषइदं॥भूरग्नयेचपृथिव्यैचमहतेचुस्वाहा॥अग्न
येपृथिव्येमहतइदं॥भुवोवायवेचांतरिक्षायचमहतेचुस्वाहा॥वायवेअं
तरिक्षायमहतइदं॥सुवरादित्यायचद्यवेचमहतेचुस्वाहा॥आदित्यायद्यवे
महतइदं॥भूर्भुवःसुवश्चंद्रमसेचनक्षत्रेभ्यश्चद्यावापृथिवीभ्यांचमहतेचुस्वाहा॥च ६७
द्रमसेनक्षत्रेभ्योदिग्भ्योइदं॥सुप्रजसंत्वाग्ने॥प्रजापतेन॥इदंविष्णु॥२४॥तत

महत१

हिरण्यगर्भाय॥भूरग्नयेपृथिव्यै॥अंगिरसांपतये॥भूरग्नयेचेतिमहाव्याहृतयः॥
ततोहादनाग्नीध्रीयंगृहीत्वापंचविंशाहंजुहोति॥जातवेदसे॥मनोज्योतिः॥म
हाव्याहृतिभिःस्त्रियःस्कंदेयाभूर्भुवःसुवश्चंद्रमसेइतिकेचित्॥नैतावत्रसप्र
तिष्ठित्याद्याःभूर्भुवःसुवरित्येतानित्याः॥ततोयजमानःकर्ताप्रायश्चित्तीयप्रा
यश्चित्तंकरिष्यइतिसंकल्पयेत्॥ब्रह्मागार्हपत्यस्यपश्चादंकपारणयावि
रोधेनजानुचाच्यस्कंदतीतिजुहोति॥भूस्वाहेति॥यजमानःअग्नयइदमित्येके
॥॥यजुर्वेदीयस्तुब्रह्मातेधेयदधिष्णाग्नेभूवःस्वाहाप्रजापतयेसर्वेभ्यो

यज्ञ ग्नेप० । अग्नात इदाहवनीये ॥ भृग्भ्यः स्रुक्वः स्वाहेति ॥ य० प्रजापतेरङ्गै० ॥
अध्वर्युस्तीर्णबर्हिषः प्रतिधान्ये करे दामादाय क्रुशायामनक्ति ॥ समेतु बर्हिर्हविषा घृतेन समादित्येर्वसुभिः संमरुद्भिः ॥ सामेदेवैर्विश्वेभिर्देवेभिरङ्गिरोभिः
ति ॥ आहवनीयेनुप्रहरति ॥ दिव्यंनभोगच्छतुयत्स्वाहेति ॥ य० दिव्यायनभसः
इदं० । अ० उच्छ्रयांते वेदिदक्षिणं पार्श्वंनिधाय क्रुवया समिध्यज्यं जुहोति ॥
देवागातुविदोगातुं वित्वागातुमित मनसस्पतइमंनोदिवंदेवेषुयज्ञꣳस्वाहा
होकाचिस्वाहा यातेधाः स्वाहेति ॥ य० देवेभ्योगातुविद्भ्योयज्ञायपरमात्मनꣳ ६८

दं० ॥ अ० प्रणिताप्रणयेयोनिधाय यजमानंवाचयति ॥ सदसिसन्नेभद्राः सर्वस्मिन्
सर्वेभद्याःपूर्णमसिपूर्णंमेभद्याअक्षितमसिमामेक्षेष्ठाइति ॥ तज्जपत्वनुभो
प्रतिदिशोसिंचतः ॥ प्राच्यांदिशि देवाक्रत्विजोमार्ज्यंतां दक्षिणायांदिशिमासाः शि
तृतरोमार्ज्यंतांप्रतीच्यांदिशिगृहाःपुत्रामोमार्ज्यंतामुदीच्यांदिश्यापुअर्धमासोय
नस्पतयोमार्ज्यंतामूर्ध्वायांदिशियज्ञःसंवत्सरोयुक्तपतिर्मार्ज्यंतां ॥ अवशिष्टा
बर्हिषिनयतः ॥ समुद्रंवः प्रहिणोम्यक्षिताःस्वायोनिमभिगच्छत ॥ अक्षितिरः
प्रजयापत्यासंमापरासेचिमत्पयइति ॥ अथास्यभागंप्राश्यसर्वेआयश्चित्ता

निऽछुरात्॥तमाग्नीध्रीय आरभते॥संस्कृतजपेनोपस्तृणन्निष्क्रामतः॥यजमा
नउपोत्थायदक्षिणपदाविष्णुक्रमान्क्रमते॥विष्णोःक्रमोस्यभिमातिहागो
यत्रेयुष्टेदसापृथिवीमनुविक्रमेनिर्भक्तःसयंद्विष्मः॥विष्णोःक्रमोस्यभिरक्षसो
हात्रेष्टेनूछंदसोनक्षत्रमनुविक्रमेति॥०॥विष्णोक्रमोस्यरातीयतोहंतानु
मतेनूछंदसादित्यमनुविक्रमेनिर्भक्तःइति॥त्रिभिस्त्रीणिपदानिप्रक्रम्य
तृतीयपदस्थानएवचतुर्थेनप्रक्रामति॥विष्णोःक्रमोसिशत्रूयतोहंतानु
विऽएषेनूछंदसादिशोनुक्रमुष्वइति॥आहवनीयमतिगच्छति॥तत्रैवति ६९

ष्ठन्नाहवनीयमुपतिष्ठते॥अगन्मसुवःसुवरगन्मसंदृश्स्त्रिमऽइस्त्रियत्तेनपू
रुस्मैतेमाक्षीति॥तत्रैवतिष्ठन्निष्क्रम्यादित्यमुपतिष्ठते॥सुभूरसिश्रेष्ठो
रश्मीनामायुर्धाअस्यायुर्मेधेहिवर्चोधाअसिवर्चोमयिधेहिइति॥अथै
भ्योलोकेभ्यःपाप्मानंप्रात्यंनिरस्यामीतिध्यायन्॥इदमुंपाप्मानंप्रात्य
व्यमाभ्योदिग्भ्योऽस्यैदिवोस्मादंतरिक्षादस्यैपृथिव्याअस्मादन्नाद्यान्निर्भजा
म्निर्भक्तःसयंद्विष्मइत्यात्मानंदर्भैःपरिमार्ज्यन्यावहिर्निरस्यापउपस्पृश्य
स्वहृदयमभिमृशति॥संज्योतिषापश्यमितिं॥अपआत्मनोदक्षिणंसमभि

पर्यावर्त्तते॥ऐडीमादत्तेसन्यावर्त्तयति॥सव्याहृत्योदङ्पर्यावर्त्तते॥संमृङ्मृज्यासं
मयोमृजासमृङ्रायस्पोषेणसंमयोरायस्पोषैरिति॥उपविश्याहवनीयेसमि
धमादधाति॥समिद्धोअग्नेमेदीदिहिसमेद्धातेअग्नेदीद्यासꣳस्वाहेति॥अग्न
यइदं॰॥तनूपतिष्ठते॥वसुमान्यज्ञोवसीयान्भूयासमिति॥स्वासनेतिष्ठ
न्गार्हपत्यमुपतिष्ठते॥अग्नआयूꣳषिपवसआसुवोर्जमिषं चनः॥आ
रेबाधस्वदुच्छुनां॥अग्नेपवस्वस्वपाअस्मेवर्चःसुवीर्यं॥दधत्पोषꣳरयिं
मयि॥अग्नेगृहपतेसुगृहपतिरहंत्वयागृहपतिनाभूयासꣳसुगृहपति ७०

मयात्वं गृहपतिनाभूयाः स्तौहिमास्तामाशिषमाशासे मत्यमित्युक्त्वा चतुर्थं
तंस्वनामोक्त्वाज्योतिष्मतीं॥ततोज्येष्ठादि क्रमेणजीवपुत्रनामानि चतुर्थ्यंतानि
वदन्प्रत्येकंज्योतिष्म॰ माशासे तंतेवै ज्योतिष्मतीमित्यंतेब्रूयात्॥अपुत्रस्तु
स्वनामग्रहणानंतरमेवंतंवैज्योतिष्मतीमितिब्रूयात्॥अथयज्ञविमोकंज
पति॥कस्त्वायुनक्तिसत्यायविꣳचतुरिति॥पूर्ववदुपविश्यपयश्चतारित्यादिस
मिधोभ्यादधाति॥अग्नेव्रतमचारिषंतदशकंतन्मेराधीत्यादिपुनःपरिषे
कंतेनुज्ञायज्ञस्यपुनरातंभंजपति॥यज्ञोवैभद्रंवसव्यावैभद्रंवसप्रजेरे

सकौ व्यधे॥ सदेवानामधिपतिर्भूयासोऽस्माꣳअधिपतीन्करोतु वयꣳस्याम पतयोरयीणां॥ इतिप्राङुत्क्रम्य जपति॥ गोमाꣳअग्नेविमाꣳअश्वीयूस्रोन्व सखासदमिदप्रमृष्यः॥ इडावाꣳएषोऽसुरप्रजावदूर्घोरयिः पृथुबुध्नः सुभावोन्निति॥ उपविश्यात्मन्नꣳसंप्रेष्यति॥ ब्राह्मणाꣳस्तर्पयतेति॥ एतदंतमधु यीः सन्निधानेनभाव्यं-ऋत्विग्यतिरेकेणब्राह्मणादशभोज्याः स्युरशक्तौत्वयएव॥ अग्नीप्रदक्षिणीकृत्यनमस्कृत्येश्वरार्पणंकुर्यादिति पूर्णमासप्रयोगः॥ ॥अथदर्शप्रयोगः॥ तत्र वपनोजनाभ्यंजनानि॥ ७१

अग्निःविष्णुः इंद्राग्नीइतिप्रधानदेवताः॥ इध्मसंभरणांते वेदंकृत्वा वेदादाना दिकृत्वाग्नीदितस्थिहरित्यंतं॥ ततोपराह्णेपिंडपितृयज्ञः॥ तद्विधिः पूर्वमेवो क्तः॥ श्वोभूतेप्रातर्होमांते कर्मणेवामित्यादि॥ देवस्यत्वासवꣳअग्नयेजुष्टं निर्वपामीति॥ देवस्यꣳइंद्राग्निभ्यांजुष्टꣳ॥ एवंप्रोक्षणादौप्रधाने॥ इंद्राग्नि भ्यामिदꣳ॥ इंद्राग्नियोरहंदेवयज्ययेंद्रियावयन्नादोभूयासं॥ ततोऋषभमि त्यस्यस्थाने॥ अमावास्यासुभगासुरावाधेनुरिवभूयआप्यायमाना॥ सा नोदोहतांसुवीर्यꣳरायस्पोषꣳसहस्रिणमपत्यायसुराधसेमावास्यायै

स्वाहेति॥ ततउज्जिति०॥ इंद्राग्न्योरहमुज्जितिमनूज्जेषं॥ अन्यत्सर्वंसमानमि
तिदर्शप्रयोगः॥ ॥अत्रैवैकप्रवरिणः पंचप्रवरिणश्चकश्चिद्दोषः॥तत्र
प्रवरमजानानस्यमनुवदितिब्रूयात्ररतिकर्मांते॥एकंव्यामंतेद्वेव्यामंत्री
न्व्यामंतेनचतुरोव्यामंतेनपंचांतिव्यामंतेइतिहोत्रंत्रेषप्रभृ॥ शेषनकेत्ये
क प्रवरविषयःऽथमो विधिःवेश्यामित्रपोरुषेत्येवंद्विप्रवरविषयोद्वितीं
यः॥निषौद्वामुष्यायणविषयौ॥तत्रद्वामुष्यायणस्यजन्मगोत्रात्द्वि
योर्वरणंप्रविष्टगोत्रादेकस्यजन्मगोत्रस्यैकार्षेयत्वेतुप्रविष्टगोत्राद् ७२

कस्येवेतिविचारण्याः॥ पंचप्रवरिणोनियोपेत्रिर्यज्जुषाद्विस्तृष्टी॥ततआव
पनेपंचमुष्टयोयथायोगंमंत्रावृत्तिः॥ततअवदाने॥ प्रथमहविषोमध्यात्पू
र्वार्द्धात्पश्चार्द्धादवदानमन्येषांमध्यात्पश्चार्द्धात्पूर्वार्द्धादिति॥ ततःस्विष्टकृ
तिउत्तरार्द्धादेवद्विवरदाने॥सकृदवदायत्रि रभिघारणंवा॥इडायांद्विरभि
घारणमितिविशेषः॥ ॥ अथऋतुसोमयागस्यदर्शेविशेषः॥अग्निः वि
विक्षुः इंद्रोमरुद्भ्योवाप्रधानदेवताः॥व्रताचरणांतेअध्वर्युः इडा॥देवा॰इति
जपित्वातूष्णीमसिद्मादायवेद्युत्करयोरंतरेणापनिष्क्रम्यविकारस्यप्राचीमु

दीची वादित्रं गत्वाध्वर्यवेत्स्यन्त्यात्रत्र गत्वाबुपर्णामश्वुकाग्रामसुषिरांपलाशस्य शाम्या वाशारवामौनक्ति॥ ऊर्ग्वेवाऊर्जित्वैत्यनुमन्त्रयादीक्षेत्॥ शारवोहरति॥ इमां प्राचीमुदीचीमिषमूर्जमभिसंस्कृतां॥ बुपर्णामश्वुकाग्रां हरामिपश्वुपा मूरमिति॥ गोष्ठं गत्वातयापउवरान्वत्सान्पाकुरोतिवाय वंस्थेतिपुंसउपाय वंस्थेतिस्त्रियः॥ यदिसंसृष्टाःसंसृष्टेनैवमंत्रेणापाकुर्यात्॥अथयत्समा त्रंःपृथक्करोति॥ देवोवःसविताप्रार्पयतुश्रेष्ठतमायकर्मणआप्यायध्व मघ्न्याइवागमन्जैस्वतीःपयस्वतीःप्रजावतीरनमीवाअयक्ष्मामावस्तेन ७३

ईशानमाघ...॥ शंसोरुद्रस्यहेतिःपरिवृणक्तिवयजमानंस्मरति॥ध्रु वाअस्मिन्गोपतौस्यातबह्वीरिति॥अथैनमग्नेपाहवनीयंपर्याहृत्यवेधुत्करो मंथेनप्रपद्यजघनेनगार्हपत्यमग्न्यागारस्योत्तरमुपगूहति॥यजमानस्य पुत्रन्त्सोहोति॥वत्सापाकरणकाछेपत्नीयजमानोव्रतमश्नीयातां॥अथाध्वर्यु र्दैवस्यत्वेत्यसिदानादिध्मसंभरणंवेदिंचकृत्वाशारवायाःपर्णीनिछित्वा गार्हपत्यस्यपुरस्तान्निधायैनांमूलतःप्रादेशमात्रींमीत्वाछित्वापउपस्पृ शेत्॥स्थूलप्रदेशंध्रुवस्याकारमुपवेषंकृत्वाजघनेनगार्हपत्यंनिधायप्रा

देशमात्राभिर्दर्भनाडीभिः सहाधस्ताद्धेधनं कृत्वाऽग्राग्रयासहदर्भगुणाभ्यांत्रि
र्वृत्तंकरोति॥त्रिवृत्पलाशोरुर्भरण्यान्त्रादेशसंमितः॥यूपेपवित्रंयोत्तरतमुपयो
क्त्रंकरोतुमेति॥ग्राग्राभ्यांपवित्रंनिधायपयसासायमग्निहोत्रंकृत्वाऽऽहवनीयं
रक्षेत्तू॥गार्हपत्यस्योत्तरतोदर्भान्स्तीर्यतेषुद्वंद्वंन्यंचिसादयति॥दोह
नपात्रेऽग्राग्राभ्यांपवित्राभ्यांसान्नाय्यतप्यतेकुंभ्याविति॥उत्तानीकृत्यकर्मउत्तु
जलेःप्रोक्षति॥शुंधध्वंदेव्यायकर्मणेदेवयुज्यायेइतिसकृन्मंत्रेणाद्रि
स्तूष्णीं॥जघन्येगार्हपत्यमुपविश्योपवेषेणोदी॰ चींगारानपोहति॥ ७४

मातरिश्वनोघर्मोसीति॥तेषुकुंभीमधिश्रयति॥द्यौरसिपृथिव्यसिविश्वधाया
असिपरमेष्ठिधाम्नादृंहस्वमाक्रोःरति॥तस्यांप्रागग्रेऽग्राग्राभ्यांपवित्राभ्यांनिदधाति॥
वसूनांपवित्रमसिशतधारंवसूनांपवित्रमसिसहस्रधारमिति॥तदन्वारभ्य
वाचंयमआयतीर्गाःप्रतीक्षते॥एताऽआचरंतिमधुमहुहानाःप्रजावतीर्यज्ञ
सोविश्वरूपाः॥बृहतीर्मयंतीरुपजायमानाऽहवरंदोरमयंतुगावः॥महंद्रोणा॥
परिकर्मणामाह॥उपस्रक्षेमेप्रब्रूतात्॥सवत्संविंशत्याह॥उपस्रक्षेतिद्रोण्य
मानामनुमंत्रयते॥घृतस्तोकेघृतोद्भौग्नयेबृहतेनाकायस्वाहाद्यावापृ

थिवीभ्यामिति॥परिक्रमदोग्धुर्हस्तादादायांतरेणवेद्युत्करोमपद्यस्रुत्रुवौपय
आनयति॥अध्वर्युस्तंपृच्छति॥कामधुक्षःप्रणेष्यन्तीर्द्रोणकलशंवृषिरंद्रियं॥मरुद्भ्
यवा॥सआहगोसु॥यस्यांदेवानांमनुष्याणांपयोहितं॥तामनुमंत्रयते॥
सावित्र्यायुरिति॥एवंद्वितीयादिषूपसृष्टासीमरित्यादिसमानं॥अनुमंत्र
णेसावित्र्यऋचः॥सावित्र्यकर्मेतिविशेषः॥एवंप्रश्नप्रतिवचनेगवांबहु
त्वे॥नैकत्वपक्षेगवामसन्निधानेदुग्धमात्रलाभेतुवत्सापाकरणाप्रभृ
तीन्मंत्रान्साधयेत्सेचनप्रभृतीन्वा॥तिसृषुदुग्धासुवाचंविसृजते॥बृ ७५

ऊदुग्धोद्रोणइतेभ्योहव्यमाप्यायतांपुनः॥वृत्रेभ्योमनुष्येभ्यःपुनर्दोहायकल्प
तामिति॥पवित्रंविसृज्यतूष्णीमुत्तरादोहयित्वादोहनपात्रेपआनीयसंस्कृत्य
नमानयति॥संवत्सध्वमितावरीरूर्मिणीर्मधुमत्तमा मरुद्धनेस्यसातयेइ
ति॥तत्खोरगृह्यस्रुचीनीकृत्यकुंभ्यामुपरिपवित्रंनिधायस्रुवेणदधात
नक्ति॥सोमेनत्वातनच्मीद्रायदधिमहेद्रायवा॥यावद्यजमानायाग्निहोत्रोछे
षणमभ्यातनक्ति॥युक्तस्यसंततिरसियुक्तस्यत्वासंततिमनुसंतनोमीति॥
कुंभ्यामुपरिपवित्रंनिधायोदकपूर्वेणकंसेनाच्छादयति॥अस्तमसिवि

७६ ष्ठवेत्वायुन्नामाधिरधाम्यहं॥ अङ्गिरसो नुपात्रेण याः पूताः परिशेरते इतिनिक्ष्यादो
गुत्तंनिदधाति॥ विष्णो हव्यं रक्ष स्वेति॥ गोष्ठंगत्वा प्रातर्दोहाय तूष्णीं दर्वेवत्सा
नपाकरोति॥ प्रातर्कृतेग्निहोत्रेकर्मणेवामित्यादि पात्रासादने ९ कपालानि
अग्नयेजुष्टंनिर्वपामीतिनिरूप्य इंद्रायजुष्टंनिर्वपामि महेंद्रायवेतिनिर्वो
पादि॥ कस्त्वायुनक्तित्येनदंतेउदगग्रेण पवित्रेणआतंचनपिधानाग्नि
होत्रोछेषणावर्जं प्रातर्दोहः सायंदोहवत्॥ जघनेनगार्हपत्यमुपविश्येो
पवेषेणादीचींगारान्नीहति॥ मातरिश्वनोघर्मोसीत्यादिमुद्राधनस्य ७६

सूतयेत्वंतेअवधूतुरंगावधूताअरातयइत्यादिध्रुष्टिकार्योपवेषमाद
त्तेध्रुष्टिरसिब्रह्मणेत्यंते॥ आग्नेयार्थंकपालान्न्यासाघेंद्रायमहेंद्रायवेकादश
कपालान्न्यासादयति॥ योगमंत्रांतेसंवपनेकपालेषुपुरोडाशमधिश्रित्याज्यं
चनिरूप्यगार्हपत्येधिश्रित्येंद्रंपुरोडाशंचाधिश्रित्यगार्हपत्यात्तूष्णीमग्नि
श्रांगारान्निरूप्यतेषुदध्यधिरोधेनसान्नाय्यकुंभ्यावधिश्रयति॥ सर्वाण्यव
दानिपर्यग्निकृत्वापुरोडाशंश्रपयति॥ विध्रुत्योरुपरिप्रस्तरंहारयित्वा पवि
त्रेणसंहसादयति॥ ततःस्योनंतइत्यादि॥ पुरोडाशोद्वासनांतेशृतंतूष्णी

७ मभिघार्यो दगुद्वास्यत्युत्तरभिघार्य पुरोडाशोत्तरतः स्रुचा पर्यूह्याग्नेनाकूरो
ति॥ यस्तआत्मापशुषु प्रविष्टोदेवानाँविष्टामनुयोवितस्थे॥ आत्मन्वान्साम
घृतवान्हिभूत्वादेवाग्नऽसुचार्विहयजमानायमर्त्यमिति॥ एवंदध्नःकृत्वा
कपालान्युद्वासयति॥ प्रयाजशेषेणहवीष्यभिघारयति पुरोडाशंश्रपयंपु
रोडाशं श्रपतंदधिउपभृतमिति॥ आग्नेयेनोपांशुयाजेनचेष्ट्वाऽनुरूपु
स्तीर्यइडयानुब्रूहिमहेंद्रायवामाग्नेमांसं० इत्यादिपश्चार्द्धोत्तरार्द्धोपु
रोडाशस्यावदायस्रुवेणद्विःश्रपतस्यतूष्णीमवदायद्विर्दध्नोवदायाभिघार्यय ७

दवदानानीतिपुरोडाशंतूष्णीमन्येप्रत्यभिघार्याज्याहुतिंहुत्वा॥ अत्याक्रम्याश्रा
वयप्रत्याश्रावितेइडंयज॥ महेंद्रंवा॥ वषट्कृतेजुहोति॥ यजमानः॥ इडायेदं०॥
इदंइडायाहंदेवयज्यायैदियावीमर्त्यायासं॥ यदिमहेंद्रायाजीयात्॥ महेंद्रायेदं०॥
महेंद्रायाहंदेवयज्यायायाजमानंमहिमानंगमेयमिति॥ हविःक्रमेणावदायखि
ष्कृद्धिजादि॥ तत्रसान्नाय्येनमनु नेतियत्तविमोकांतेयजमानउत्करस्य
पश्चात्स्रुवस्तिष्ठन्नुपवेषस्रुचंप्रदेशंनयोपगूहति॥ यंद्विष्मोमनुष्येषू
पवेषमधारयन्॥ योअस्मद्रपचेतसुस्तानस्मभ्यंमिहाकरु॥ उपवेषोपवि

ढ्नः प्रजां पुष्टिमधो धनं॥ द्विपदो नश्चतुष्पदो ऽक्रूवान नेपगा कुरु इति॥ ततः
पयस्वतीरित्यादि॥ अनुक्रमं सर्वं समानं॥ ॥ इति कृतसोमस्य दर्शप्रयोगः॥
अथैकाध्वर्यु प्रयोगः॥ दर्शपूर्णमासयोश्चत्वार ऋत्विजः॥ तत्रैकस्मिन्हवि
र्भिवेदिरिणाः प्रचरेयुः॥ न्यूनसंख्यया वृत्या सर्वप्रायश्चित्तं जुहुयात्॥ य
दायजमानएवाध्वर्युस्तदाग्निधारं हुत्वाकर्मकुर्यात्॥ यजमानएवैकएवकुर्या
त्तदादक्षिणात्रोपः॥ यदाध्वर्युरेकएवकुर्यात्यजमानोसन्निहितोसमर्थो
वातदैकाध्वर्यवंप्रायश्चित्तंकुर्यात्॥ सर्वदाऋत्विक्समासविषयंप्राय ७८

श्चित्तंपुरोप्रयाज्येभ्योजुहुयात्॥ ॥तत्रप्रयोगक्रमः॥ ॥अध्वर्युरिज्यादेवहू
रित्यावृत्याजपित्वातत्तत्कर्माधिकारेकुर्यात्॥ युगपत्करणीयानिक्रमेणकु
र्यात्॥ हवींष्यंतर्वेद्यासाद्यहविषांपश्चात्स्वयमासीनएवसर्वादेवताय
जति॥ अग्नयेसमिध्यमानायान्वाहेत्युक्त्वाजपत्वंसमिधेनीर्ध्रुवंस
मिधोभ्याधायवेदेनोपवीजनंकृत्वाग्नेमहांस्त्रिब्राह्मणभारतेत्यंतमु
क्त्वोच्छ्रयतिवेदे॥ तिष्ठन्त्रवरमीरयेत्॥ उपविश्यामत्यस्यतइत्युक्त्वा
स्रुवेणाघारमाघार्यमनोसीत्युक्तातिएन्देवेइडइत्यादिआवहजातवेदः

सुयजायज्ञेयंतं व देत॥ उपविश्यादितिर्मातेत्यादि तंहन्मीत्यंतमुत्काग्नेपत्नैकमुप्रि
संमार्जने कृत्वाभुवनमसीत्यादि स्रुचमाघार्यानुमंत्रणं कृत्वाभाश्रावयत्यंदेवे
घित्यादिब्रह्मवर्चसायेत्यंतमुत्कातिष्ठन्नाश्रावणादि कृत्वासोमानुषदित्यत्रस्व ना
मोत्कोपविश्यदेवसवितरेतेत्याद्यप्युतइत्यादिमानुषदित्यंतमुत्कोत्तिष्ठतावेदा
युषेत्यादिमुखसंमार्जनं कृत्वावेद्यांदर्भमय्यासनेऽहेदेधिषेत्यादि नोपविश्य
ऋपतयेनमइतिआदिमम होत्रंजुषध्वमित्यंतमुत्काज्यस्थाल्यास्त्रेवोपहत्ये
काध्वर्यवआयश्चित्तंजुहुयात॥ जुहोवाचेत्यांमंजुहोवाचस्यतयेदेवि ७०

नाकू॥ यद्दाचोमधुमत्तस्मिन्मा धाः स्वाहासरस्वत्येस्वाहा॥ सरस्वत्याइदं॥ इमामेवाग्नि
नायत्तस्ययद्दाचायत॥ दुरिष्टंतदग्निर्नोभेषजेनसंदधाथूंस्वाहा॥ अग्नयेभिषजे
दं॥ त्रातारमिंद्रमवितारमिंद्रूं हवेहवेसुहवूंश्रूरमिंद्रं॥ हुवेनुशक्रंपुरुहूतमिं
द्रूंस्वस्तिनोमघवापात्विंद्रःस्वाहा॥ इंद्रायेदं॥ मन्मेमनसिश्रुत्यंदाचोयज्ञेमेह
दः॥ देवासस्त छमयंतुसर्वूंसोमोवहस्मतिश्चस्वाहा॥ देवेभ्यःसोमायवृत्रघ्न
तयइदं॥ यद्दिदौसोयदविद्वाूंसोमुग्धा कुर्वंत्यन्विजः॥ अग्निर्मातस्मादेन
सःप्रदादेवीचमुंचतूंस्वाहा॥ त्रग्नयेप्रदायेदेव्यइदं॥ यदंतरिक्षंपृथि

वीमुतद्यो यन्मातरंपितरं वाजिहिꣳसिम॥अग्निर्मातस्मादेनसोगार्हपत्यः प्रमुंचतु
दुरितायानिचकमकुरोतुमामेतेन सुꣳस्वाहा॥अग्नयेगार्हपत्यायेदं०॥ब्रह्मन्वेहो य
त्रअध्वर्यवआग्नीध्रेचैकएवयज्ञे॥यत्पर्याणि तन्मेदेवारक्षांसिप्राणान्मेमाहिꣳ
सिषुःस्वाहा॥देवेभ्यइदं०॥अहंब्रह्माहꣳहोताहमध्वर्युरहमाग्नीध्रोहं यजमान
एकएवास्मि॥यत्पर्याणि०सिषुःस्वाहा॥देवेभ्यइदं०॥एवमष्टाहुतीर्हुत्वास्रुगादा य
पनमुल्कावेद्यामासीनएवाश्रावणादिकृत्वा यथोक्तादेवताःक्रमेणयजेत्॥
प्राग्निश्चमिडावदानंसुरूपं नुमंत्रपांचकृत्वापर्वाज्ञनमवांतरेडांचमध्ये ८०

नहस्तेनकृत्वेडामुपहूयचतुर्धाकृत्वावांतरेडांप्राश्येडाभक्षपंकृत्वाप्लेदेनमार्जनं
कृत्वाहोत्मार्जनंचकृत्वाप्रेषपूर्वकं प्राग्निश्चंप्राश्यब्रह्मन्निचस्वेत्यादिअन्वाहार्यं
स्वयंगृह्णीयात्॥संप्रेषपूर्वकमनुयाजादिब्राह्मणानर्पणांतंकुर्यात्॥इत्येकाध्वर्य
वप्रयोगः॥अथप्रवसतियजमानेसहयाजमानःस्वस्त्वंयजमानःप्रवसतिसयत्र
स्यात्तद्दोनंध्यायेत्॥सयदिविसंस्थितआगच्छेत्कृतमनुमंत्र्यक्रमांतेनप्रक्रमे
त्॥अत्रोदाहरंतीतिकिःयस्यपुत्रोनेवासीवातंकर्मणिस्यात्ततःप्रक्षेपेत्॥
सयदिविसंस्थितआगच्छेत्कृताद्याप्रक्रामेन्नवादियतोभोन्येवयजमानभागं

प्राश्नीतामितिहैवैपे॥यजमानस्यैमंत्रोजपेन्नैवचस्थितः॥तङ्गांप्रस्तरेपोवदहेदाह
वनीयके॥अवाज्यान्तर्युपस्तीर्यतुष्णीमाज्यंजुहुयादिमंमितिगोपालः॥यावंतिस्वामिकर्मा
णिमंत्रोक्तानीतराणिच॥तेषांनिवृत्तिःसर्वेषांतत्स्थानेजपएवहि॥विष्णुक्रमोत्सर्पणं
तुकर्तव्यंवचनाङ्गवेत्॥अदृष्टार्थानिलुप्यंतेजपेमंत्रांश्चतानपि॥इतित्रिकांडमं
डनः॥ ॥इतिप्रवसतियजमानेसहयजमानः॥ ॥अथहोत्रं॥दर्शेपूर्णमासयो
र्हविष्यासन्नेतुहोतामंत्रितःप्राङुदग्वाहवनीयादवस्तायप्राङ्मुखोयज्ञोपवीती
हाविरोदुहिरा चम्यदक्षिणावत्तीर्थेनविहारंप्रेप्याभिहुतन्तरेणापादेनवेदिश्रोण्यो ८१
प

न्तरेणापर्शौसमानिधायप्रपदेनबर्हिराक्रम्यसंहितोपाणीधारयन्नाकाशवत्यंगु
ल्यौहृदयसंमितावंकसंमितौवाद्यावापृथिव्योःसंधिमीक्षमाणःप्रेषितोजपति॥नमः
प्रवक्रेनमउपवीक्रेनमोनुख्यात्रेकरदमनुवस्पतिसदमनुवस्पतिषण्मोवीरंहस
स्यातुद्यौश्चपृथिवीचाहश्चरात्रिश्चापश्चौषधयश्चवाकूसमस्तिनयसःसाधुंसं
सिप्रपद्येहमेवमाममुमितिस्वंनामादिशेत॥भूतेभविष्यतिजातेजनिष्यमाण
आत्मजाम्यपात्यंवाचोऽशीतिंवह॥अंगुल्यग्राण्यवरुध्यजानुवेदोरमयापृथ्
व्यमयीतिप्रतिसंदधात्॥नर्मेद्यावापृथिवीवर्म्योन्निर्वर्मसूर्योवर्मेसंतुतिर

ऋक्॥ तनयवाचःप्रथमंमसीय येनासुरां अभिदेवाअसाम॥ऊर्जोदउत यासःपंचजनामम होत्रंजुषध्वं॥हिꣳभर्भुवःस्वरोंप्रयोयाजाअग्नियोहविष्मतोघताच्यादेवांजिगातिसुम्नयोंꣳप्रयोवा०॥ च्या॥देवांजिगातुयोंꣳप्रयोच्यादेवांजिगातिसुम्नयोꣳमनआमाहिवीतयेग्ं पानोहव्यदातये॥निहोतासत्सिबर्हिषोंनेत्वासमिद्भिरंगिरोघतेनवर्धयामसि॥बृहछोचायविष्ठ्योंसनःपृथुश्रवाय्यमछदेवविवाससि॥बृहदग्नेसुवीर्योमीळेन्योनमस्यसिरस्तमांसिदर्षतः॥समग्निरिध्यतेबृषोंव्योअग्निःसमिध्यतेश्योनदेवाहनः॥तंहविष्मंतईळते

तोंवृषणंन्वावयंवृषन्वृषणःसमिधीमहि॥अग्नेदीदयंबृहोमग्निंदूतंवृणीमहेहोतारंविश्ववेदसं॥अस्ययज्ञस्यसुक्रतोंसमिध्मानोअध्वरेग्निःपावकईड्यः॥शोचिष्केशंनीमहोसमिद्धोअग्नआहुतेदेवान्यक्षिस्वधर॥त्वंहिहव्यवाळसोमाजुहोतादुवस्यताग्निंप्रयत्यध्वरेवृणीध्वंहव्यवाहनोमाजुहोता०३॥वृणीध्वंव नोमाजु॰रेवृणी॰नोमग्नेमहोंअसिब्राह्मणाभारत॥अवसायाजमानस्यार्चयान्त्रवृणीतेयावंतस्युःपरंपरंप्रथमंपोरोहित्यंराजन्विद्वांराजपीन्वाराज्ञां॥मानवेळपौरूरवसइति॥अत्रानेसं

शायेचसर्ववर्षांनांमानवेति॥देवेोमन्विदृत्विष्टोविप्रानुमदितःकविशस्तो
ब्रह्मसंशितोघनाहवनःप्रणीर्यज्ञानांरथीरध्वरापामतन्तीहोतातूर्णिर्हव्यवा
ट्इत्यवसाया॥अस्यात्रंजुहूर्देवानांचमसोदेवपानो यं इवाग्नेनेमिर्देवां
स्त्वंपरिभूरस्यावहदेवान्यजमानाय॥अग्निमग्नआ३वह॥सोममा३वह॥
अग्निमा३वह॥विष्णुउपांशुआ३वह॥अग्नीषोमावा३वहा॥इंद्रंवेमध्यमावह॥
देवांआज्येपांआ३वह॥अग्निंहोत्रायावहत्वंमहिमानमावह॥आवहजा
तवेदःसुयजायज॥इतिपौर्णमास्यं॥अग्नि०ह॥सोम०ह॥अग्नि०ह॥विष्णु ८३

उपां०वहइंद्राग्नीआ०देवानित्यादि॥अमावास्यायामसन्नयतः॥सन्नयतइंद्राग्नि
रवानइंइमहेंइंद्राआवह॥देवानित्यादि॥आवाद्यथाऽस्तंनयत्यूर्ध्वानानुरुपवि
स्योरग्नेदेव्यंत्यत्पात्रंनोआदेशंकुर्यात्॥अदितिर्मोतास्यांतरिक्षान्माछे
न्सीरिडस्पदमग्निनादेवेनदेवतयाङ्गिरस्वतारस्तोमेनरर्यंतरेपसाम्नागायत्रेपा
छंदसाग्निष्टोमेनयज्ञेनवषट्कारेणयज्ञेपयोस्मान्रेरियंचवयंद्विषस्तंरु
न्धि॥आश्रावयेतिप्रतिप्रस्थातरेतत्॥आश्रावयेतिचेद्देवाआवयमानुमं
त्रयेषु कीर्त्येयज्ञसेन्नस्यवर्चसाय॥प्रेषानंदेवसवितरेतंत्वाकृषतेग्निंहो

चायसहपित्रावेभ्यानरेभ्यावाद्यावापृथिवीभ्यांपाताम्ग्निर्होतेहंमानुषः॥मानुष
इत्यध्वर्योश्रुत्वा॥उदायुषास्थायुषोदोषधीनांरसेनोत्पर्जन्यस्यधामन्निरुद्रस्य
मरुतांअनुस्तुत्तिष्ठेत्॥षष्ठिभ्याध्वर्योनयतिश्वपाश्चाग्निंहोतारमंतरा
विचेतसः॥सिनेतिपाकमतिधीरएनीत्युत्छायब्रूयात्॥ऋतस्यपंथामन्वेमि
होतारित्यभिक्रम्य॥अंसेध्रुमन्वारभेतपार्श्वस्थेनदक्षिणपाणिनापार्श्व
स्थेनसव्येनांसरेणाग्नीध्रं॥उभावचारभ्य॥इंद्रमन्वारभामहेहोत्रंर्षे
पुरोहितं॥येनायंनुनमंस्वदेवाअंगिरसोदिवं॥अन्वारंभंविमुच्य॥संमार्ग ८४

त्पोस्थिरभ्यात्मंनुरवंसंमृजीत॥सम्मार्गोसिसम्मार्ग्यजयापभुभिर्मृडि॥सरु
मंत्रेणाद्विस्तृच्छीतनःस्पृदकंहोत्पदनमपरेणाग्नाभुखस्खित्वाभिमंत्र
येत॥अहेदेधिषवोतस्तिष्ठान्यस्यसदनेसीदयोस्मन्नाकतरइति॥अं
गुष्ठोपकनिष्ठिकाभ्यांहोत्पदनात्पांप्रत्यग्दक्षिणानिरसेत्॥निरस्तःपराव
सुः॥इत्यपउपस्पृश्य॥इदमहमर्वाचीनोःसदनेसीदामिदक्षिणोनरिणापस्छे
नोपविश्य॥देवबर्हिस्त्वासस्छेन्त्वाध्यासदेयमित्युपविश्यब्रूयात्॥अग्निहिष
होतःप्रतरांबर्हिषद्रेवइति॥जानुस्त्रिरसाबर्हिरुपस्पृश्यअतऊर्ध्वंजपेत्॥

ऋपतयेनमोऽधिपतयेनमोऽधिपतीनांपतयेनमोऽधिपतयेनमः प्राणंप्रपद्येपानं
प्रपद्येव्यानंप्रपद्येवाचंप्रपद्येचक्षुःप्रपद्येश्रोत्रंप्रपद्येमनःप्रपद्यआत्मानंप्र
पद्येगायत्रींप्रपद्येत्रिष्टुभंप्रपद्येजगतींप्रपद्येनुष्टुभंप्रपद्येछंदांसिप्रपद्ये॥
व स्त्योनोदिवस्पातुवातोअंतरिक्षात्॥अग्निर्नःपार्थिवेभ्यः॥नमोमह्द्भ्यो न
मोऽर्भकेभ्योनमोयुवभ्योनमआशिनेभ्यः॥यजामदेवान्यदिशक्नवा
ममाज्यायसःशंसमावृक्षिदेवाः॥विश्वेदेवाःशास्तनमायथेहोतावतो
मनंवेयंनिषद्य॥प्रमेधूतभागधेयंयथावोचेनपथाहव्यमाजोहवानि॥ ८५

अरापिहोतानिषदायजीयानभिप्रयांसिसुधितानिहिख्यत्॥यजामहेयत्तिया
न्नंतदेवांईळामहाईळ्योआशेनृ॥तदग्नवाचःप्रथमंनुषध्यं॥इतिप्रदीक्षरभे
समाप्य॥स्रुचावादायेन्निगदेन॥अग्निर्होतावेत्वग्नेर्होत्रंवेत्तुप्रावित्रंमाधु
तेयज्ञमानदेवतायोऽग्निं॥इत्यध्वर्यवे॥होतारमरथाइतिजपेत्॥अथनिग
दंसमापयेत्॥घृतवतीमध्वर्यो स्रुचमास्यस्वदेवयुंविश्वयारेईन्ना
महैदेवां ईळेन्यान्नमस्यामनमस्यान्यजामेयत्तियान्॥समाप्तेस्मिन्निगदे
प्रयाजेश्रंतिः॥पंचेतेभवंति॥एकैकंप्रेषितोयजति॥येऽयजामहेसमिधः

८६ समिधोऽग्नआज्यस्यव्यंतूंवोषट्इतिप्रथमः॥यागोजः सहओजोमयिप्राणा
पानौ॥इतिवषट्कारमुत्कोत्कानुमंत्रयते॥येयजामहेतन्नपादग्नआज्यस्यवे
तूंवोषट्॥इतिद्वितीयः॥ ॥अन्यत्रवसिष्ठभ्रुनकाग्निवध्यश्चराजन्येभ्यः॥
येयजामहेनराशंसोऽग्नआज्यस्यवेतूंवोषट्॥इतितेषांद्वितीयः॥ये३
यजामहऽइळोऽग्नआज्यस्यव्यंतूंवोषट्॥इतितृतीयः॥येयजामहेबर्हि
रग्नआज्यस्यवेतूंवो३॥इतिचतुर्थः॥ये३य०स्वाहाग्निंस्वाहासोमंस्वा
हाग्निंस्वाहाविष्णुं३०स्वाहाग्नीषोमोस्वाहेंद्रंवेमधंस्वाहाद्रवाआज्यपाजु ८६

षावाऽग्नआज्यस्यव्यंतूंवो॥इतिपंचमःपोर्णमास्यां॥ये३य०विष्णुंस्वाहेत्यं
तेइंद्राग्नीस्वाहेत्यसन्नयतः॥विष्णुंस्वाहेंद्रमहेंद्रंवास्वाहेतिसन्नयतो मावा
स्यायां॥एतावन्मंद्रेणप्रयोक्तव्यं॥ऊर्ध्वंप्रयाजेभ्यआस्विष्टकृतोमध्यमेन
॥स्विष्टकृत्प्रभृतिश्रांयुवाकांतमुत्तमेन॥ऊर्ध्वंचश्रांयुवाकान्मंद्रेण॥त्रि
ष्वपिस्थानेषुसत्तमयमेनवषट्कारःप्रयोक्तव्यः॥ततएकावरोहेणयाज्या
॥ ॥अथाज्यभागौ॥अग्निर्वैत्राणिजंघनद्विषास्युर्विपन्यया॥समिधःशु
क्रआहुतो२॥ये३य०ग्निंजुषाणोआग्निराज्यस्यवेतूंवो३॥त्वंसोमासिस

त्पतिस्त्वं राज्ञो नवत्रहा॥त्वंभ द्रोअसिक्रतो३॥ये॰य॰सोमेजुषाणःसोमआ
ज्यस्य हविषो वेत्तवौ॥इतिवार्त्तघ्नोपोर्णमास्यां॥अग्निःप्रत्नेनमन्मना शुं
भानस्तेन्वंस्वां॥कविर्विप्रेणावदधो३॥सोमगीर्भिष्टावयंवृधेयामेवको
विदः॥सुष्टुतीकोनआविशो३॥इत्यमावास्यायांहृदयंचेतो॥याज्येपूर्वो
क्ते॥आदित्याराध्याज्यभागपर्यंतंअंतराचयाज्यानुवाक्येसर्वेषांवा
ग्यमः॥तूष्णीमेवअतोदेवाअवंतुनइतिजपेदपिवान्यो॥अथप्रधाने॥अ
ग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं॥अपांरेतांसिजिन्वतो३॥ये२य ८७

जामहेग्निंधुवोयज्ञस्यरजसश्चनेतायत्रानियुद्भिःसचसेशिवाभिः॥दिवि
र्धामंदधिषेस्वर्षांजिह्वामग्नेचकृषेहव्यवाहंको२॥इत्याग्नेयस्य॥इदंविष्णुर्वि
चक्रमे त्रेधानिदधेपदंःसमूढमस्यपांसुरेइत्युपांशुयाज्यायैः॥
एवंयाज्यायां॥ये३य॰विष्णुस्त्रिर्देवःपृथिवीमेषएतांविचक्रमेशतर्चसंम
हित्वा॥प्रविष्णुरस्तवतसस्त्वीयान्त्वेषंह्यस्यस्कृधिरस्यनामावो३॥इति
चैष्णवस्य॥अग्नीषोमासवेदसासहूतीवनतंगिरः॥संदेवत्रावभूवथो३॥
ये२य॰हेग्नीषोमोयुवमेतानिदिविरोचनान्यग्निश्चसोमसक्रतूअधत्तं॥

च

उवेसिंधूंरभिशस्तेरवद्यादग्नीषोमावमुंतंगृभीतांवो॥इत्यग्नीषोमाभ्यांस्यु॥विनुरं
द्रमपोजहिनीचायछतन्यतः॥योअस्मां अभिदासत्यधरंगमयातमोंयेऽय०
रंद्रंवेमध्यंमृगोनभीमःकुचरोगिरिष्ठाःपरावतआजगंथापरस्याः॥स्रकंसंशा
यपविमिंद्रतिग्मंविशत्रूंताञ्छचिविमृधोनुदस्वाथोषट्॥इत्येंद्रवैमध्यस्यरंद्राग्नी
अवसागतमस्मभ्यंचर्षणीसहा॥माताेदुःशंसईशतो॥२॥येऽय०हरंद्राग्नीगी
र्भिर्विप्रःप्रमतिमिच्छमानरंहेरथियंनासंत्यंभाज॥रंद्राग्नीवत्रहणासुवज्रा
प्रनोनयेभिस्तिरतंदेष्णेवेषि॥इत्येंद्राग्नस्य॥एंइमानसिंरथिंसत्रित्वानंसदा ८८

सहे॥वर्धिष्ठमूतयेभरो॥येऽय०महरंद्रंप्रससाहिषेपुरूतशत्रूंत्येष्ठस्तेभुज
रहस्तिरस्व॥रंद्रामरदक्षिणेनानस्तनिपतिःसिंधूनामसिरेवतीनांवोऽइत्येंद्रस्य
॥महांरंद्रोयऊर्जसापर्जन्योवृष्टिमांइव॥स्तोमैर्वत्सस्यवावृधो॥येऽय०म
हेंद्रंभुवस्त्वमिंद्रब्रह्मणामहान्भुवोविश्वेषुसवनेषुयज्ञियः॥भुवोनंरंध्योर्नोवि
श्वस्मिन्भरेज्येष्ठ्यमंत्रोविश्वचर्षणीवो॥३रतिमाहेंद्रस्य॥पित्रोर्हिहेंदोउत्त
तोयविष्ठविद्मोरत्नंरंतुपतेयजेह॥येदेवासऋत्विजस्तोमिरग्नेत्वेहोतृषाम
स्यायजिष्ठा॥येऽयजामहेग्निंस्विष्टकृतमयाऽग्निरग्नेःप्रियाधामान्ययाट्सो

मस्यप्रियाधामान्ययाच्छग्नेःप्रियाधामान्ययाऽउ॰विष्णोःप्रियाधामान्ययाल्ग्नी
षोमयोःप्रियाधामान्ययालिंद्रस्यवैश्वदेवस्यप्रियाधामान्ययाऽदेवानामाज्यपानां
प्रियाधामानि॥यक्षदग्नेर्होतुःप्रियाधामानियक्षत्त्वंमहिमानमायजतामेमायि
षःऋणोनुसोऽअध्वराजातवेदानुषतोहविरग्नेयदद्यविष्णोऽअध्वरस्यहोतःपाव
कशोचेवेषुंहियज्ञा॥ऋतायजासिमहिनाविधर्हुयावृधविष्टयानेऽग्नयोवो॰
रतिषेणीमास्यां॥विष्णोःप्रियाधामान्ययालिंद्राग्न्योःप्रियाधामान्ययाऽदेवा
भानित्याद्यसन्नयतः॥विष्णोःप्रियाधामान्ययालिंद्रस्यमहेंद्रस्यकाप्रियाधा

मान्ययाऽदेवानामिन्निसन्नयतोमावास्यायां॥अनवानंयजतिप्रकृत्यावा॥प्रदेशि
न्याःपर्वण्युत्तमेअंजयित्वौष्ठयोरभ्यांमंनिमार्ष्टि॥वाचस्पतिनातेऽहन्त्स्येषेप्रा
णायप्राश्नामिरत्नुत्तरमुन्नरे॥मनसस्पतिनातेऽहन्त्स्योर्जेपानायप्राश्नामिरत्स
धरमधरे॥स्रष्टोदकमंजलिनेंगेप्रतिगृह्यसमेपाष्णोऽत्वापश्चादस्याऽदगं
गुलिंपाणिमुपधायावांतरेणामयदापयीत॥अंतरेणांगुष्ठमंगुलीभ्यांस्वय
हितीयमादत्ते॥प्रत्यालब्धामंगुष्ठेनाभिसंगृह्यप्रत्यंगुलीरसृष्टिरू
त्यादक्षिणतऽत्रोपरिगृह्यास्यसम्मितामुपदधतेप्राणसंमितांवा॥ऽत्रोपदू

नासहविर्वहतादित्येनोपास्मा इन्द्राङ्हयतांसहविर्वहतादित्येनेन्द्रोपहूता
सहांतरिक्षेणवामदेव्येनवायुनौस्मा इन्द्राङ्हयतांसहांतरिक्षेणवामदेव्येनवा
युनेन्द्रोपहूतासहर्धिभ्यारथंतरेणाग्निनोपास्मा इन्द्राङ्हयतांसहर्धिभ्या
रथंतरेणाग्निना॥उपहूतागावःसहाश्विरउपमागावःसहाश्विराङ्हयंतामु
पहूताधेनुःसहऋषभोपमांधेनुःसहऋषभाङ्हयतामुपहूतागौर्घतपृ
ष्युपमांगौर्घतपरीङ्हयतामुपहूतादित्याःसप्तहोतारउपमांदित्याःसप्तहो
तारोङ्हयंतामुपहूतःसरस्वाभक्षउपमांसरस्वाभक्षोङ्हयतामुपहूतेन्द्रावद ५०

ष्टिरुपमामिन्द्रावष्टिर्ङ्हयतां॥इत्युपांश्वथोद्वैः॥इन्द्रोपहूतोपहूतेन्द्रोपास्मा
इन्द्राङ्हयतामिन्द्रोपहूता॥मानवीघतपरीमेत्रावरुणीब्रह्मदेवत्यंतमुपहूतं
दैव्याअध्वर्यवउपहूताउपहूतामनुष्याः॥यइमंयज्ञमनान्येचयन्तपतिंव
धीनुपहूतेधात्रापृथिवीहवंजेऋतावरीदेवीदेवपुत्रे॥उपहूतोयंयज्ञ
मानउत्तरस्यांदेवयज्यायामुपहूतोध्रुवसिहविष्करण्यदंमेदेवाहविर्जु
षंतामितितस्मिन्नुपहूतः॥इत्युपहूयावांतरेन्द्रांप्राश्नीयात्॥इन्द्रेभागंजु
षस्वनःपिन्वगाजिन्वार्यंतोरायस्पोषस्येशिषे॥तस्यनोरायश्चतस्यनोदास्त

स्मासेभागमवीमहि॥सर्वात्मानःसर्वतनवःसर्ववीराःसर्वपुरुषाः॥इत्यृचं ते
रेळांभक्षयित्वेलामपिभक्षयेत्॥ततआहवनीयस्यपश्चाद्दक्षिणोत्तरिणीप
रुछेनोपविश्यपाश्यात्येःपरिस्तरणैःप्राञ्चुरवोंजलिंनतीर्यापत्रासेच
यतेतन्माजनं॥ततश्चतुर्हीकरणदक्षिणायोः॥कःइदंकस्माअदात्कामः
कामायादात्कामोदाताकामः प्रतिग्रहीताकामंसमुद्रमाविशाकामेनत्वा
प्रतिगृह्णामिकामैतत्तेवष्टिरसिद्योस्त्वादातुपृथिवीप्रतिगृह्णात्वितिप्र
तिग्रहः॥अथानुयाजाः॥देवंवर्हिर्वसुवनेवसुधेयस्यवेतवो॥देवेन ५१

राशोवसुवनेवसुधेयस्यवेतवो॥देवोअग्निःस्विष्टकृत्सुहविषामंहः
कविःसत्यमन्मायजीहोताहोतुर्हौतुरायजीयानग्नेयांदेवानयाड्यांअपिप्रे
यंतेहोत्रेमत्सततांससमनुषोहोत्रांदेवंगमद्विदेवेषुयज्ञमेरयेसंस्वि
ष्टकृच्चाग्नेहोताभूर्वसुवनेवसुधेयस्यनमोवाकेवीहोवो॥३॥अमत्सतेस
त्रावसानं॥सूक्तवाकायसंप्रेषितःइदंद्यावापृथिवीभद्रमभूत्साभूत्सू
क्तवाकमुतनोवाकमध्यास्मसूक्तोक्थमग्नेत्वंसूक्तवागसि॥उपश्रुतीदिव
स्पृथिव्योरोमन्वतीर्तेमन्यज्ञेयजमानद्यावापृथिवीस्तांगयोजीरदान्तू

अभयंकृतौ॥ रक्षिता वारीत्यापरं भुवो मयोभुवऊर्जस्वतीपयस्वती च
चत्वमूअग्नेवेदउक्थ्यतौंस्पचरणांश्चधिचरणाचतयोराविदित्यवसा
य॥ अग्निरिदं हविरजुषतावीवधतमहोज्यायोकृत॥ सोमइदं॰कृत॥अग्नि
रिदं॰कृत॥विष्णुइदं॰कृत॥अग्नीषोमाविदं हविरजुषेतामवीवधेतांमहो
ज्यायोकृतां॥ इंद्रोचेमंधइदं॰॥ कृत॥ देवाऊज्यपाआज्यमजुषंतावीव
धंतमहोज्यायोकृत॥अग्निर्होत्रेपीदं॰कृत॥ इतिपोर्णमास्यां॥॥अमावा
स्यायांविष्णोरनंतरं इंद्राग्नीइदं हविरजुषेतामवीवधेतांमहोज्यायोकृ
तां॥ इत्यसन्नयतः॥ इंद्राग्निस्थाने इंद्रइदं॰कृत॥मरुद्भ्यइदं॰कृत॥इति ५३

वासन्नयतः॥अन्यत्समानं॥अस्याम्धेदोग्धीदेवगमायामाग्नास्तेयंयज
मानोसावसावित्यस्यव्यवहारिकनाक्षत्रेनामनीप्रथमयाविभक्त्यादिशेत्॥
होतुर्गुरुश्चेद्यजमानस्तत्संनिधौतस्योपांशुनामनीब्रूयात्॥ कार्त्तिकः॥रो
हिणः॥रोहिणोवा॥मार्गशीर्षः॥आर्द्रकः॥पुनर्वसुः॥पौषः।आश्लेषः।माघः
फाल्गुनः। हस्तः।चैत्रः॥स्वातिः।विशाखः।अनुराधः।ज्येष्ठः।मूलकआषाढः।
आषाढीयोवा॥श्रावणः।श्रविष्ठः।शतभिषः।शतभिषग्वा।भाद्रपदः।रेवतः
॥अश्विनः।भारणीतिनाक्षत्राद्याः॥आयुरान्नास्तेसुप्रजास्त्वमान्नास्तेराय

स्योपमाश्रास्तेसजातवनस्यामाश्रास्तउत्तरंदेवयज्यामाश्रास्तेभ्रयोहविर्धा
णमाश्रास्तेदिव्यं धामाश्रास्तेविश्वंप्रिय माश्रास्तेयदनेनहविषाश्रास्तेतद
रयात्तदध्यात्तदस्मेदेवा रासंतां तदग्निर्देवोदेवेभ्योवनतेवयमग्नेमानु
षाः॥ दृष्टंचविद्मंचोभेचनोद्यावापृथिवी अंहसस्पातामे हगतिर्वामर्त्ये
दंनमोदेवेभ्यः॥ संयुवाकायसंप्रेषितः॥ तछंयोरावृणीमहेगातुंयज्ञाय
गातुंयज्ञपतयेदेवीस्वस्तिरस्तुनस्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वंजिगातुभेषजं
शंनोअस्तुद्विपदेशंचतुष्पदे॥इत्याहानुवाक्यावदन्यंवांतनोवेदंग्रही ९३

यात्॥ वेरोमिवेरोविदेयेति॥ उशयुपेत्येनेनोपोत्थायोत्तरेणगार्हपत्यंगत्वाप
श्चात्गार्हपत्यस्यदक्षिणोत्तरिणोपस्थेनतूष्णीमुपविश्यसोमंत्वष्टारंदेवा
नांपत्नीरग्निंगृहपतिमित्याज्येनयजंति॥आप्यायस्वसमेतुतेविश्वतःसोम
वृष्ण्यं॥भवावाजस्यसंगथे इत्युपांशु॥ॐमितिमंद्रोजिष्ठः॥येयज्ञमहेसो
मंसंतेपयांसिसमुयंतुवाजाःसंवृष्ण्यान्यभिमातिषाहः॥आप्यायमानोऽम
ृतायसोमदिविश्रवांस्युत्तमानिधिष्व इत्युपांशुवौषट्इत्यच्चैरितिसर्वत्र
॥इहत्वष्टारमग्रियंविश्वरूपमुपह्वये॥अस्माकमस्तुकेवलः॥ॐ॥ येयज्ञा॰

त्वष्टारं तन्नस्तुरीपंपोषयित्नुदेवत्वष्टरिरराणस्यरायः॥यतोवीरःकर्मण्यःसुद
क्षोयुक्ष्वाहाजायतेदेवकामाःवो॰देवानांपत्नीरुशतीरवंतुनःप्रावंतुन
स्तुजयेवाजसातये॥याःपार्थिवासोयाअपामपित्रतेतानोदेवीःसुहवाः
शर्मयच्छत॥ॐ॥ये३यजा॰देवानांपत्नीरुतप्रावंतुदेवपत्नीरिंद्राण्यग्ना
य्यश्विनीराट्॥आरोदसीवरुणानीश्रोतुर्यंतुदेवीर्यऋतुर्जनीनांवो॰
अग्निर्होताग्रहपतिःसराजाविश्वावेदजनिमाजातवेदाः॥देवानामुतयो
मत्तीनांयज्ञिष्टःसप्रयजतामृतवाॐ॥ये३यजा॰हेअग्निंग्रहपतिं

हयवाळग्निरजरःपितानोविभुर्विभावासुदक्षीकोअस्मे॥सुगार्हपत्याःस
मिषोदिदीह्यस्मद्यक्ष्मंमिमीहिश्रयांसीवो॰॥वाचस्पतिनातेइत्यादितस्मिंनु
पहूतइत्येतमुल्काहुछीप्राइयपूर्ववदुपविश्यवेदंपत्नीप्रदायवाचयेत्॥
वेदोसिवित्तिरसिविदेयकर्मासिकरणमसिक्रियासंसनिरसिसनितासिस
नेयंघृतवंतंकुलायिनंरायस्पोषंसहस्रिणंवेदोदातुवाजिनं॥यंवहवउ
पत्नीवंतियोजनानामसद्दशी॥तंविदेयप्रजांविदेयकामायत्वाहति॥प्रजा
कामाचेदंशिरसानाभिमालभेत॥नित्यत्वेन॥अथास्योत्कंविमुंचे

त्॥ प्रत्यामुंचामि वरुणस्य पाशाद्येनत्वाबध्नात्सविता सुशेवः॥ ऋतस्य योनौ सुकृत
स्य लोकेरिष्टांत्वा सह पत्नीरुदाभम्॥ इतिविमुच्य। तत्रयग्नाहपत्याद्दुगुंप्राक्षा
ञ्चंनिधाय। वेदंविस्रस्य तत्तृणानियोक्रस्योपरिष्टादुदग्ग्राणि करोति तत्सुर
क्षासंश्लिष्टमुदग्ग्रमेव पूर्णपात्रंनिधायतदभिमृशन्नभिमृशंतींवाचयेत्
॥ पूर्णमसि पूर्णमेभूयाःसुपूर्णमसि सुपूर्णमेभूयाःसदसि सन्मेभूयाःस
र्वमसि सर्वंमेभूयाःअक्षितिरसि मामेधेष्ठाः॥ इत्यथैनांपूर्णपात्रात्यतिदि
शामुदकमुदक्षन्नुदक्षंनींवाचयति॥ प्राच्यांदिशिदेवाऋत्विजोमार्जयंतां॥द ५५

क्षिणस्यांदिशिमासाःपितरोमार्जयंतां॥ प्रतीच्यांदिशिगृह्याःपशवोमार्जयं
तां॥ उदीच्यांदिशिआपश्चौषधयोवनस्पतयोमार्जयंतां॥ ऊर्ध्वायांदिशि
यज्ञःसंवत्सरःप्रजापतिर्मार्जयंतां॥ अथास्याउत्तानमंजलिमधस्ता
योक्रस्यनिधायात्मनश्चसंपूर्णपात्रंनिनयन्वाचयेत्॥ माहंप्रजां
परासिचंयानःसयावरीरुदन्॥ समुद्रोनिनयानिस्वंपाथोअपीधे
ति॥ नात्रप्राञ्चुरवत्तमाद्रियते॥ अधस्तादंजलिनिधानस्यादृष्टार्थ
त्वप्रसंगात्॥ पत्नीद्वित्वेबहुत्वेप्रत्येकंवाचनं॥ ज्येष्ठाक्रमेणयोक्रा

९६ ञि मंत्रावत्याविमुच्ययोक्तविधानादिनियमांतंसद्यवभवति॥वेदत
प्राणिदक्षिणहस्तेनाग्नेर्गृहीत्वाऽवधूयचनसंयमनंततंस्रुत्पात्रा
र्हपत्यादाहवनीयमेति॥तंतुतच्चनरज्ञसोभानुमन्विहीति॥शेषंनिधाय
स्रुक्स्रुवेणादायसर्वप्रायश्चित्तानिजुहुयात्॥अयाश्चाग्ने
स्यनभिशस्तीश्चसत्यमित्त्वमयाअसि॥अयासाचयसाकृतोया
सन्हव्यमूहिषेयानोधेहिभेषजंस्वाहा॥अग्नयेऽयसइदं०॥इ
तियजमानः॥अतोदेवाअ०भिःस्वाहा॥देवेभ्यइदं०॥इदंविष्णुः० ९६

---

९७ सुरेस्वाहा॥विष्णवइदं०॥भूःस्वाहा॥भुवःस्वाहा॥स्वःस्वाहा॥भूर्भुवःस्वः
स्वाहेति॥ॐचमेस्वश्चमेयज्ञोपचतेनमश्च॥यत्तेन्यूनंतस्मैतउपयत्ते
तिरिक्तंतस्मैतेनमः॥॥इतिसंस्रुजपेनोपस्थायतीर्थं ननिष्क्रम्यानि
यमइतिहोत्रं॥अवादीयमनंतेनश्रिष्टेषजनुष्टये॥दर्शस्यपूर्णमा
सस्यप्रयोगोस्रुक्संस्करेमतः॥॥इतिश्रीमद्रुद्रनाभट्टात्मजदेवीयरघु
नाथोक्तौतप्रयोगरत्नेभूषायांदर्शपूर्णमासप्रयोगाख्यंरत्नतीयरत्नं॥॥
॥छ॥छ॥॥॥छ॥॥छ॥॥॥छ॥॥॥छ॥ ९७

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥ इतिनवहस्तकृतदर्शपूर्णमासः समाप्तः ॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY